## नश्चापदान्तस्य झलि। (२४/१२३)

नकारस्य मकारस्य च अपदान्तस्य अनुस्वारादेशो भवति झलि परतः। पयांसि। यशांसि। सर्पींषि[1]। मकारस्य – आक्रंस्यते। [2]आचिक्रंस्यते। अधिजिगांसते। अपदान्तस्य इति किम्? राजन् भुङ्क्ष्व। झलि इति किम्? [3]रम्यते। [4]गम्यते॥

## मो राजि समः क्वौ। (२५/१२६)

समो मकारस्य मकारः आदेशो भवति राजतौ क्विप्प्रत्ययान्ते परतः। सम्राट्। [5]साम्राज्यम्। मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम्। राजि इति किम्? संयत्। समः इति किम्? [6]किंराट्। क्वौ इति किम्? संराजिता। [7]संराजितुम्। संराजितव्यम्॥

## हे मपरे वा। (२६/१२७)

हकारे मकारपरे परतो मकारस्य वा मकार आदेशो भवति। किं ह्मलयति, किम् ह्मलयति। कथं ह्मलयति, कथम् ह्मलयति।

[१३७] यवलपरे [8]यवला वा। (म.भा. ३. ४२८)

यवलपरे हकारे मकारस्य यवला [9]यथासङ्ख्यं वा भवन्ति इति वक्तव्यम्। कियँ ह्यः, किं ह्यः। किवँ ह्वलयति, किं ह्वलयति। किलँ ह्लादयति, किं ह्लादयति॥

## नपरे नः। (२७/१२९)

नकारपरे [10]हे परतः मकारस्य वा नकारादेशः भवति। किन् ह्नुते, किं ह्नुते। कथन् ह्नुते, कथं ह्नुते॥

## ङ्णोः कुक्टुक् शरि। (२८/१३०)

ङकारणकारयोः पदान्तयोः [11]कुक् टुक् इत्येतावागमौ वा भवतः शरि परतः। प्राङ्क् शेते, प्राङ [12]शेते। प्राङ्क् षष्ठः, प्राङ षष्ठः। प्राङ्क् साये, प्राङ साये। णकारस्य – वण्ट् शेते, वण् शेते[13]। पूर्वान्तिकरणं प्राङ्क् छेते इत्यत्र छत्वार्थम्। 'शश्छोऽटि' (८.४.६३/१२०) इति हि पदान्ताज् झयः इति तद् विज्ञायते। इह मा भूत्, 'पुरा क्रूरस्य विसृपो विरप्शिन्' (वा. सं. १. २८)। प्राङ्क् सायः इत्यत्रापि 'सात् पदाद्योः' (८.३.१११/२१२३) इति षत्वप्रतिषेधार्थं च। वण्ट् सायः इत्यत्र च 'न पदान्ताट् टोरनाम्' (८.४.४२/११४) इति ष्टुत्वप्रतिषेधार्थम्॥

---

1. धनूंषि इत्यधिकम् इ, यजूंषि इत्यधिकम ह, हवींषि इत्यधिकम् ब. 2. विक्रंस्यते ब. इ. 3. नम्यते इ. 4. मन्यते तन्यते क. 5. सम्राड्भ्याम् क. 6. राट् क. ह, विराट् ब. 7. सराजितुम् नास्ति इ. 8. ह्रे यवला वा मकारस्य इति वक्तव्यम् ब. क. ह. 9. यथासङ्ख्येन क. 10. हकारे इ. 11. यथासङ्ख्येम् इत्यधिकम् ब. क. इ. 12. शेरते ह. 13. वण्ट् षण्डे वण् षण्डे वण्ट् साये वण् साये इत्यधिकम् क. ड.